# ShrIpratyangira Sahasranamastotra

# શ્રીપ્રત્યઙ્ગિરાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrIpratyangirAsahasranAmastotram

File name : pratyangirAsahasranAmastotra.itx

Category : sahasranAma, devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, PSA Easwaran

Description-comments : See corresponding nAmAvalI

Source : shrIrudrayAmale tantre dashavidyA rahasye

Latest update : August 3, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2022

*sanskritdocuments.org*

# શ્રીપ્રત્યઙ્ગિરાસહસ્રનામસ્તોત્રમ્

શ્રીરુદ્રયામલતન્ત્રે દશવિદ્યારહસ્યે

ઈશ્વર ઉવાચ ।
શ ृણુ દેવિ પ્રવક્ષ્યામિ સામ્પ્રતં ત્વત્પુરઃસરમ્ ।
સહસ્રનામ પરમં પ્રત્યઙ્ગિરાયાઃ સિદ્ધયે ॥

સહસ્રનામપાઠે યઃ સર્વત્ર વિજયી ભવેત્ ।
પરાભવો ન ચાસ્યાસ્તિ સભાયાં વાસને રણે ॥

તથા તુષ્ટા ભવેદ્દેવી પ્રત્યઙ્ગિરાસ્ય પાઠતઃ ।
યથા ભવતિ દેવેશિ સાધકઃ શિવ એવ હિ ॥

અશ્વમેધસહસ્રાણિ વાજપેયસ્ય કોટયઃ ।
સકૃત્પાઠેન જાયન્તે પ્રસન્ના યત્પરા ભવેત્ ॥

ભૈરવોઽસ્ય ઋષિશ્છન્દોઽનુષ્ટુપ્ દેવિ સમીરિતા ।
પ્રત્યઙ્ગિરા વિનિયોગઃ સ્યાત્સર્વસમ્પત્તિ હેતવે ॥

સર્વકાર્યેષુ સંસિદ્ધિઃ સર્વસમ્પત્તિદા ભવેત્ ।
એવં ધ્યાત્વા પઠેદ્દેવીં યદીછેદાત્મનો હિતમ્ ॥

અથ ધ્યાનમ્ ।
આશામ્બરા મુક્તકચા ઘનચ્છવિર્ધ્યેયા સચર્માસિકરા વિભૂષણા ।
દંષ્ટ્રોગ્રવક્ત્રા ગ્રસિતાહિતા ત્વયા પ્રત્યઙ્ગિરા શઙ્કરતેજસેરિતા ॥

ૐ અસ્ય શ્રીપ્રત્યઙ્ગિરાસહસ્રનામમહામન્ત્રસ્ય,
ભૈરવ ઋષિઃ, અનુષ્ટુપ્ છન્દઃ, શ્રીપ્રત્યઙ્ગિરા દેવતા,
હ્રીં બીજં, શ્રીં શક્તિઃ, સ્વાહા કીલકં
મમ સર્વકાર્યસિદ્ધ્યર્થે વિદ્યાસિદ્ધ્યર્થે નામપારાયણે વિનિયોગઃ ।
ૐ દેવી પ્રત્યઙ્ગિરા સેવ્યા શિરસા શશિશેખરા ।
સમાઽસમા ધર્મિણી ચ સમસ્તસુરશેમુષી ॥ ૧॥

સર્વસમ્પત્તિજનની સમદા સિન્ધુસેવિની ।
શમ્ભુસીમન્તિની સોમારાધ્યા ચ વસુધા રસા ॥ ૨॥

રસા રસવતી વેલા વન્યા ચ વનમાલિની ।
વનજાક્ષી વનચરી વની વનવિનોદિની ॥ ૩॥

વેગિની વેગદા વેગબલા સ્થાનબલાધિકા ।
કલા કલાપ્રિયા કૌલિ કોમલા કાલકામિની ॥ ૪॥

કમલા કમલાસ્યા ચ કમલસ્થા કલાવતી ।
કુલીના કુટિલા કાન્તા કોકિલા કુલભાષિણી ॥ ૫॥

કીરકેલિઃ કલા કાલી કપાલિન્યપિ કાલિકા ।
કેશિની ચ કુશાવર્તા કૌશામ્બી કેશવપ્રિયા ॥ ૬॥

કાશી કાશાપહા કાંશીસઙ્કાશા કેશદાયિની ।
કુણ્ડલી કુણ્ડલીસ્થા ચ કુણ્ડલાઙ્ગદમણ્ડિતા ॥ ૭॥

કુશાપાશી કુમુદિની કુમુદપ્રીતિવર્ધિની ।
કુન્દપ્રિયા કુન્દરુચિઃ કુરઙ્ગમદમોદિની ॥ ૮॥

કુરઙ્ગનયના કુન્દા કુરુવૃન્દાભિનન્દિની ।
કુસુમ્ભકુસુમા કિઞ્ચિત્ક્વણત્કિઙ્કિણિકા કટુઃ ॥ ૯॥

કઠોરા કરણા કણ્ઠા કૌમુદી કમ્બુકણ્ઠિની ।
કપર્દિની કપટિની કઠિની કાલકણ્ઠિકા ॥ ૧૦॥

કિબ્રુહસ્તા કુમારી ચ કુરુન્દા કુસુમપ્રિયા ।
કુઞ્જરસ્થા કુઞ્જરતા કુમ્ભિકુમ્ભસ્તનદ્વયા ॥ ૧૧॥

કુમ્ભિકા કરભોરુશ્ચ કદલીદલશાલિની ।
કુપિતા કોટરસ્થા ચ કઙ્કાલી કન્દશેખરા ॥ ૧૨॥

એકાન્તવાસિની કિઞ્ચિત્કમ્પમાનશિરોરુહા ।
કાદમ્બરી કદમ્બસ્થા કુઙ્કુમી પ્રેમધારિણી ॥ ૧૩॥

કુટુમ્બિની પ્રિયાયુક્તા ક્રતુઃ ક્રતુકરી ક્રિયા ।
કાત્યાયની કૃત્તિકા ચ કાર્તિકેયપ્રવર્તિની ॥ ૧૪॥

કામપત્ની કામધાત્રી કામેશી કામવન્દિતા ।

કામરૂપા કામગતિઃ કામાક્ષી કામમોહિતા ॥ ૧૫॥

ખડ્ગિની ખેચરી ખઞ્જા ખઞ્જરીટેક્ષણા ખલા ।
ખરગા ખરનાસા ચ ખરાસ્યા ખેલનપ્રિયા ॥ ૧૬॥

ખરાંશુઃ ખેટિની ખરખટ્વાઙ્ગધારિણી ।
ખલખણ્ડિનિ વિખ્યાતિઃ ખણ્ડિતા ખણ્ડવી સ્થિરા ॥ ૧૭॥

ખણ્ડપ્રિયા ખણ્ડખાદ્યા સેન્દુખણ્ડા ચ ખઞ્જની ।
ગઙ્ગા ગોદાવરી ગૌરી ગોમત્યાપિ ચ ગૌતમી ॥ ૧૮॥

ગયા ગૌર્ગજી ગગના ગારુડી ગરુડધ્વજા ।
ગીતા ગીતપ્રિયા ગોત્રા ગોત્રક્ષયકરી ગદા ॥ ૧૯॥

ગિરિભૂપાલદુહિતા ગોગા ગોકુલવર્ધિની ।
ઘનસ્તની ઘનરુચિર્ઘનોરુર્ઘનનિઃસ્વના ॥ ૨૦॥

ઘૂત્કારિણી ઘૂતકરી ઘુઘૂકપરિવારિતા ।
ઘણ્ટાનાદપ્રિયા ઘણ્ટા ઘનાઘોટપ્રવાહિની ॥ ૨૧॥

ઘોરરૂપા ચ ઘોરા ચ ઘૂનીપ્રીતિ ઘનાઞ્જની ।
ઘૃતાચી ઘનમુષ્ટિશ્ચ ઘટાઘણ્ટા ઘટામૃતા ॥ ૨૨॥

ઘટાસ્યા ઘટાનાદા ચ ઘાતપાતનિવારિણી ।
ચઞ્ચરીકા ચકોરી ચ ચામુણ્ડા ચીરધારિણી ॥ ૨૩॥

ચાતુરી ચપલા ચારુશ્ચલા ચેલા ચલાચલા ।
ચતુશ્ચિરન્તના ચાકા ચિયા ચામીકરચ્છવિઃ ॥ ૨૪॥

ચાપિની ચપલા ચમ્પૂશ્ચિત્તચિન્તામણિશ્ચિતા ।
ચાતુર્વર્ણ્યમયી ચઞ્ચચ્ચૌરા ચાપા ચમત્કૃતિઃ ॥ ૨૫॥

ચક્રવર્તિ વધૂશ્ચક્રા ચક્રાઙ્ગા ચક્રમોદિની ।
ચેતશ્ચરી ચિત્તવૃત્તિરચેતા ચેતનાપ્રદા ॥ ૨૬॥

ચામ્પેયી ચમ્પકપ્રીતિશ્ચણ્ડી ચણ્ડાલવાસિની । (ચપ્રિયા ચક્રિકા)
ચિરઞ્જીવિતદાચિત્તા તરુમૂલનિવાસિની ॥ ૨૭॥

છુરિકા છત્રમધ્યસ્થા છિદ્રા છેદકરી છિદા ।
છુચ્છુન્દરીપલપ્રીતિઃ છુન્દરીભનિભસ્વના ॥ ૨૮॥

છલિની છલવચ્છિન્ના છિટિકા છેકકૃત્તથા ।
છદ્મિની છાન્દસી છાયા છાયાકૃચ્છાદિરિત્યપિ ॥ ૨૯॥

જયા ચ જયદા જાતિર્જૃમ્ભિણી જામલાયુતા ।
જયાપુષ્પપ્રિયા જાયા જાપ્યા જાપ્યજગજ્જનિઃ ॥ ૩૦॥

જમ્બૂપ્રિયા જયસ્થા ચ જઙ્ગમા જઙ્ગમપ્રિયા ।
જન્તુર્જન્તુપ્રધાના ચ જરત્કર્ણા જરદ્ગવા ॥ ૩૧॥

જાતીપ્રિયા જીવનસ્થા જીમૂતસદૃશચ્છવિઃ ।
જન્યા જનહિતા જાયા જમ્ભજમ્ભિલશાલિની ॥ ૩૨॥

જવદા જવવદ્વાહા જમાની જ્વરહા જ્વરી ।
ઝઞ્ઝા નીલમયી ઝઞ્ઝાઝણત્કારકરાચલા ॥ ૩૩॥

ઝિંટીશા ઝસ્યકૃત્ ઝમ્પા યમત્રાસનિવારિણી ।
ટઙ્કારસ્થા ટઙ્કધરા ટઙ્કારકારણા ટસી ॥ ૩૪॥ var ટકારસ્થા
ઠકુરા ઠીકૃતિશ્ચૈવ ઠિણ્ઠીરવસનાવૃતા ।
ઠણ્ઠા નીલમયી ઠણ્ઠા ઠણત્કારકરા ઠસા ॥ ૩૫॥

ડાકિની ડામરા ચૈવ ડિણ્ડિમધ્વનિનાદિની ।
ઢક્કાપ્રિયસ્વના ઢક્કાતપિની તાપિની તથા ॥ ૩૬॥

તરુણી તુન્દિલા તુન્દા તામસી ચ તપઃપ્રિયા ।
તામ્રા તામ્રામ્બરા તાલી તાલીદલવિભૂષણા ॥ ૩૭॥

તુરઙ્ગા ત્વરિતા તોતા તોતલા તાદિની તુલા ।
તાપત્રયહરા તારા તાલકેશી તમાલિની ॥ ૩૮॥

તમાલદલવચ્છાયા તાલસ્વનવતી તમી ।
તામસી ચ તમિસ્રા ચ તીવ્રા તીવ્રપરાક્રમા ॥ ૩૯॥

તટસ્થાતિલતૈલાક્તા તારિણી તપનદ્યુતિઃ ।
તિલોત્તમા તિલકકૃત્તારકાધીશશેખરા ॥ ૪૦॥

તિલપુષ્પપ્રિયા તારા તારકેશકુટુમ્બિની ।
સ્થાણુપત્ની સ્થિતિકરી સ્થલસ્થા સ્થલવર્ધિની ॥ ૪૧॥

સ્થિતિસ્થૈર્યા સ્થવિષ્ઠા ચ સ્થાવતિઃ સ્થૂલવિગ્રહા ।
દન્તિની દણ્ડિની દીના દરિદ્રા દીનવત્સલા ॥ ૪૨॥

દેવી દેવવધૂર્દૈત્યદમિની દન્તભૂષણા ।
દયાવતી દમવતી દમદા દાડિમસ્તની ॥ ૪૩॥

દન્દશૂકનિભા દૈત્યદારિણી દેવતાઽઽનના ।
દોલાક્રીડા દયાલુશ્ચ દમ્પતી દેવતામયી ॥ ૪૪॥

દશા દીપસ્થિતા દોષા દોષહા દોષકારિણી ।
દુર્ગા દુર્ગાર્તિશમની દુર્ગમા દુર્ગવાસિની ॥ ૪૫॥

દુર્ગન્ધનાશિની દુઃસ્થા દુઃસ્વપ્નશમકારિણી ।
દુર્વારા દુન્દુભિધ્વાના દૂરગા દૂરવાસિની ॥ ૪૬॥

દરદા દરહા દાત્રી દયાદા દુહિતા દશા ।
ધુરન્ધરા ધુરીણા ચ ધૌરેયી ધનદાયિની ॥ ૪૭॥

ધીરા ધીરાધરિત્રી ચ ધર્મદા ધીરમાનસા ।
ધનુર્ધરા ચ ધમિની ધૂર્તા ધૂર્તપરિગ્રહા ॥ ૪૮॥

ધૂમવર્ણા ધૂમપાના ધૂમલા ધૂમમોદિની ।
નલિની નન્દની નન્દા નન્દિની નન્દબાલિકા ॥ ૪૯॥

નવીના નર્મદા નર્મી નેમિર્નિયમનિશ્ચયા ।
નિર્મલા નિગમાચરા નિમ્નગા નગ્નિકા નિમિઃ ॥ ૫૦॥

નાલા નિરન્તરા નિઘ્ની નિર્લેપા નિર્ગુણા નતિઃ ।
નીલગ્રીવા નિરીહા ચ નિરઞ્જનજની નવી ॥ ૫૧॥

નવનીતપ્રિયા નારી નરકાર્ણવતારિણી ।
નારાયણી નિરાકારા નિપુણા નિપુણપ્રિયા ॥ ૫૨॥

નિશા નિદ્રા નરેન્દ્રસ્થા નમિતા નમિતાપિ ચ ।
નિર્ગુણ્ડિકા ચ નિર્ગુણ્ડા નિર્માંસા નાસિકાભિધા ॥ ૫૩॥

પતાકિની પતાકા ચ પલપ્રીતિર્યશશ્વિની ।
પીના પીનસ્તના પત્ની પવનાશનશાયિની ॥ ૫૪॥

પરા પરાકલા પાકા પાકકૃત્યરતિપ્રિયા ।
પવનસ્થા સુપવના તાપસી પ્રીતિવર્ધિની ॥ ૫૫॥

પશુવૃદ્ધિકરી પુષ્ટિઃ પોષણી પુષ્પવર્ધિની ।
પુષ્પિણી પુસ્તકકરા પુન્નાગતલવાસિની ॥ ૫૬॥

પુરન્દરપ્રિયા પ્રીતિઃ પુરમાર્ગનિવાસિની ।
પેશા પાશકરા પાશબન્ધહા પાંશુલાપશુઃ ॥ ૫૭॥

પટઃ પટાશા પરશુધારિણી પાશિની તથા ।
પાપઘ્ની પતિપત્ની ચ પતિતાઽપતિતાપિ ચ ॥ ૫૮॥

પિશાચી ચ પિશાચઘ્ની પિશિતાશનતોષિતા ।
પાનદા પાનપાત્રા ચ પાનદાનકરોદ્યતા ॥ ૫૯॥

પેષા પ્રસિદ્ધિઃ પીયૂષા પૂર્ણા પૂર્ણમનોરથા ।
પતદ્ગર્ભા પતદ્ગાત્રા પૌનઃપુણ્યપિવાપુરા ॥ ૬૦॥

પઙ્કિલા પઙ્કમગ્ના ચ પામીપા પઞ્જરસ્થિતા ।
પઞ્ચમા પઞ્ચયામા ચ પઞ્ચતા પઞ્ચમપ્રિયા ॥ ૬૧॥

પઞ્ચમુદ્રા પુણ્ડરીકા પિઙ્ગલા પિઙ્ગલોચના ।
પ્રિયઙ્ગુમઞ્જરી પિણ્ડી પણ્ડિતા પાણ્ડુરપ્રભા ॥ ૬૨॥

પ્રેતાસના પ્રિયાલુસ્થા પાણ્ડુઘ્ની પીતસાપહા ।
ફલિની ફલદાત્રી ચ ફલશ્રી ફણિભૂષણા ॥ ૬૩॥

ફૂત્કારકારિણી સ્ફારા ફુલ્લા ફુલ્લામ્બુજાસના ।
ફિરઙ્ગહા સ્ફીતમતિઃ સ્ફિતિઃ સ્ફીતિકરી તથા ॥ ૬૪॥

વનમાયા બલારાતિર્બલિની બલવર્ધિની ।
વેણુવાદ્યા વનચરી વીરા બીજમયી અપિ ॥ ૬૫॥

વિદ્યા વિદ્યાપ્રદા વિદ્યાબોધિની વેદદાયિની ।
બુધમાતા ચ બુદ્ધા ચ વનમાલાવતી વરા ॥ ૬૬॥

વરદા વારુણી વીણા વીણાવાદનતત્પરા ।
વિનોદિની વિનોદસ્થા વૈષ્ણવી વિષ્ણુવલ્લભા ॥ ૬૭॥

વિદ્યા વૈદ્યચિકિત્સા ચ વિવશા વિશ્વવિશ્રુતા ।
વિતન્દ્રા વિહ્વલા વેલા વિરાવા વિરતિર્વરા ॥ ૬૮॥

વિવિધાર્કકરા વીરા બિમ્બોષ્ઠી બિમ્બવત્સલા ।
વિન્ધ્યસ્થા વીરવન્દ્યા ચ વરીયાનપરાચવિત્ ॥ ૬૯॥

વેદાન્તવેદ્યા વૈદ્યા ચ વેદસ્ય વિજયપ્રદા ।

વિરોધવર્ધિની વન્ધ્યા વન્ધ્યાબન્ધનિવારિણી ॥ ૭૦॥

ભગિની ભગમાલા ચ ભવાની ભયભાવિની ।
ભીમા ભીમાનના ભૈમી ભઙ્ગુરા ભીમદર્શના ॥ ૭૧॥

ભિલ્લી ભલ્લધરા ભીરુર્ભેરુણ્ડી ભીર્ભયાપહા ।
ભગસર્પિણ્યપિ ભગા ભગરૂપા ભગાલયા ॥ ૭૨॥

ભગાસના ભગામોદા ભેરી ભઙ્કારરઞ્જિતા ।
ભીષણા ભીષણારાવા ભગવત્યપિ ભૂષણા ॥ ૭૩॥

ભારદ્વાજી ભોગદાત્રી ભવઘ્ની ભૂતિભૂષણા ।
ભૂતિદા ભૂમિદાત્રી ચ ભૂપતિત્વપ્રદાયિની ॥ ૭૪॥

ભ્રમરી ભ્રામરી નીલા ભૂપાલમુકુટસ્થિતા ।
મત્તા મનોહરમના માનિની મોહની મહી ॥ ૭૫॥ var ભામિની
મહાલક્ષ્મીર્મદક્ષીબા મદીય મદિરાલયા ।
મદોદ્ધતા મતઙ્ગસ્થા માધવી મધુમાદિની ॥ ૭૬॥

મેધા મેધાકરી મેધ્યા મધ્યા મધ્યવયસ્થિતા ।
મદ્યપા માંસલા મત્સ્યમોદિની મૈથુનોદ્ધતા ॥ ૭૭॥

મુદ્રા મુદ્રાવતી માતા માયા મહિમ મન્દિરા ।
મહામાયા મહાવિદ્યા મહામારી મહેશ્વરી ॥ ૭૮॥

મહાદેવવધૂર્માન્યા મધુરા વીરમણ્ડલા ।
મેદસ્વિની મીલદશ્રીર્મહિષાસુરમર્દિની ॥ ૭૯॥

મણ્ડપસ્થા મઠસ્થા ચ મદિરાગમગર્વિતા ।
મોક્ષદા મુણ્ડમાલા ચ માલા માલાવિલાસિની ॥ ૮૦॥

માતઙ્ગિની ચ માતઙ્ગી મતઙ્ગતનયાપિ ચ ।
મધુસ્રવા મધુરસા મધૂકકુસુમપ્રિયા ॥ ૮૧॥

યામિની યામિનીનાથભૂષા યાવકરઞ્જિતા ।
યવાઙ્કુરપ્રિયા માયા યવની યવનાધિપા ॥ ૮૨॥

યમઘ્ની યમકન્યા ચ યજમાનસ્વરૂપિણી ।
યજ્ઞા યજ્વા યજુર્યજ્વા યશોનિકરકારિણી ॥ ૮૩॥

યજ્ઞસૂત્રપ્રદા જ્યેષ્ઠા યજ્ઞકર્મકરી તથા ।

યશસ્વિની યકારસ્થા યૂપસ્તમ્ભનિવાસિની ॥ ૮૪॥

રઞ્જિતા રાજપત્ની ચ રમા રેખા રવેરણી ।
રજોવતી રજશ્ચિત્રા રજની રજનીપતિઃ ॥ ૮૫॥

રાગિણી રાજ્યનીરાજ્યા રાજ્યદા રાજ્યવર્ધિની ।
રાજન્વતી રાજનીતિસ્તથા રજતવાસિની ॥ ૮૬॥

રમણી રમણીયા ચ રામા રામાવતી રતિઃ ।
રેતોવતી રતોત્સાહા રોગહૃદ્રોગકારિણી ॥ ૮૭॥

રઙ્ગા રઙ્ગવતી રાગા રાગજ્ઞા રાગકૃદ્રણા ।
રઞ્જિકા રઞ્જિકારઞ્જા રઞ્જિની રક્તલોચના ॥ ૮૮॥

રક્તચર્મધરા રઞ્જા રક્તસ્થા રક્તવાદિની ।
રમ્ભા રમ્ભાફલપ્રીતિ રમ્ભોરુ રાઘવપ્રિયા ॥ ૮૯॥

રઙ્ગભૃદ્રઙ્ગમધુરા રોદસી રોદસીગ્રહા ।
રોધકૃદ્રોધહન્ત્રી ચ રોગભૃદ્રોગશાયિની ॥ ૯૦॥

વન્દી વદિસ્તુતા બન્ધા બન્ધૂકકુસુમાધરા ।
વન્દીત્રા વન્દિતામાતા વિન્દુરા વૈન્દવીવિધા ॥ ૯૧॥

વિઙ્કિ વિઙ્કુપલા વિઙ્કા વિઙ્કુસ્થા વિઙ્કુવત્સલા ।
વદિર્વિલગ્ના વિપ્રા ચ વિધિર્વિધિકરી વિધા ॥ ૯૨॥

શઙ્ખિની શઙ્ખવલયા શઙ્ખમાલાવતી શમી ।
શઙ્ખપાત્રાશિની શઙ્ખાશઙ્ખા શઙ્ખગલા શશી ॥ ૯૩॥

શંવી શરાવતી શ્યામા શ્યામાઙ્ગી શ્યામલોચના ।
શ્મશાનસ્થા શ્મશાના ચ શ્મશાનસ્થલભૂષણા ॥ ૯૪॥

શમદા શમહન્ત્રી ચ શાકિની શઙ્કુશેખરા ।
શાન્તિઃ શાન્તિપ્રદા શેષા શેષસ્થા શેષદાયિની ॥ ૯૫॥

શેમુષી શોષિણી શીરી શૌરિઃ શૌર્યા શરા શિરિઃ ।
શાપહા શાપહાનીશા શમ્પા શપથદાયિની ॥ ૯૬॥

શૃઙ્ગિણી શૃઙ્ગપલભુક્ શઙ્કરી શઙ્કરી ચ યા ।
શઙ્કા શઙ્કાપહા સંસ્થા શાશ્વતી શીતલા શિવા ॥ ૯૭॥

શિવસ્થા શવભુક્તા ચ શવવર્ણા શિવોદરી ।
શાયિની શાવશયના શિંશપા શિશુપાલિની ॥ ૯૮॥

શવકુણ્ડલિની શૈવા શઙ્કરા શિશિરા શિરા ।
શવકાઞ્ચી શવશ્રીકા શવમાલા શવાકૃતિઃ ॥ ૯૯॥

શયની શઙ્કુવા શક્તિઃ શન્તનુઃ શીલદાયિની ।
સિન્ધુઃ સરસ્વતી સિન્ધુસુન્દરી સુન્દરાનના ॥ ૧૦૦॥

સાધુઃ સિદ્ધિઃ સિદ્ધિદાત્રી સિદ્ધા સિદ્ધસરસ્વતી ।
સન્તતિઃ સમ્પદા સમ્પત્સંવિત્સરતિદાયિની ॥ ૧૦૧॥

સપત્ની સરસા સારા સરસ્વતિકરી સ્વધા ।
સરઃસમા સમાના ચ સમારાધ્યા સમસ્તદા ॥ ૧૦૨॥

સમિદ્ધા સમદા સમ્મા સમ્મોહા સમદર્શના ।
સમિતિઃ સમિધા સીમા સવિત્રી સવિધા સતી ॥ ૧૦૩॥

સવતા સવનાદારા સાવના સમરા સમી ।
સિમિરા સતતા સાધ્વી સધ્રીચી ચ સહાયિની ॥ ૧૦૪॥

હંસી હંસગતિર્હંસા હંસોજ્જ્વલનિચોલુયુક્ ।
હલિની હલદા હાલા હરશ્રીર્હરવલ્લભા ॥ ૧૦૫॥

હેલા હેલાવતી હેષા હ્રેષસ્થા હ્રેષવર્ધિની ।
હન્તા હન્તિર્હતા હત્યા હા હન્ત તાપહારિણી ॥ ૧૦૬॥

હઙ્કારી હન્તકૃદ્ધઙ્કા હીહા હાતા હતાહતા ।
હેમપ્રદા હંસવતી હારી હાતરિસમ્મતા ॥ ૧૦૭॥

હોરી હોત્રી હોલિકા ચ હોમા હોમો હવિર્હરિઃ ।
હારિણી હરિણીનેત્રા હિમાચલનિવાસિની ॥ ૧૦૮॥

લમ્બોદરી લમ્બકર્ણા લમ્બિકા લમ્બવિગ્રહા ।
લીલા લોલાવતી લોલા લલની લાલિતા લતા ॥ ૧૦૯॥ var લોકા
લલામલોચના લોચ્યા લોલાક્ષી લક્ષણા લલા ।
લમ્પતી લુમ્પતી લમ્પા લોપામુદ્રા લલન્તિની ॥ ૧૧૦॥

લન્તિકા લમ્બિકા લમ્બા લઘિમા લઘુમધ્યમા ।
લઘીયસી લઘુદયી લૂતા લૂતાનિવારિણી ॥ ૧૧૧॥

લોમભૃલ્લોમલોમ્રા ચ લુલુતી લુલુસંયતી ।
લુલાયસ્થા ચ લહરી લઙ્કાપુરપુરન્દરી ॥ ૧૧૨॥

લક્ષ્મીર્લક્ષ્મીપ્રદા લક્ષ્મ્યા લક્ષાબલમતિપ્રદા ।
ક્ષુણ્ણા ક્ષુપા ક્ષણા ક્ષીણા ક્ષમા ક્ષાન્તિઃ ક્ષણાવતી ॥ ૧૧૩॥

ક્ષામા ક્ષામોદરી ક્ષીમા ક્ષૌમભૃત્ક્ષત્રિયાઙ્ગના ।
ક્ષયા ક્ષયકરી ક્ષીરા ક્ષીરદા ક્ષીરસાગરા ॥ ૧૧૪॥

ક્ષેમઙ્કરી ક્ષયકરી ક્ષયદા ક્ષણદા ક્ષતિઃ ।
ક્ષુરન્તી ક્ષુદ્રિકા ક્ષુદ્રા ક્ષુત્ક્ષામા ક્ષરપાતકા ॥ ૧૧૫॥

॥ ફલશ્રુતિઃ ॥

માતુઃ સહસ્રનામેદં પ્રત્યઙ્ગિર્યા વરપ્રદમ્ ॥ ૧॥

યઃ પઠેત્પ્રયતો નિત્યં સ એવ સ્યાન્મહેશ્વરઃ ।
અનાચાન્તઃ પઠેન્નિત્યં દરિદ્રો ધનદો ભવેત્ ॥ ૨॥

( var  યઃ પઠેત્પ્રયતો નિત્યં  દરિદ્રો ધનદો ભવેત્)
મૂકઃ સ્યાદ્વાક્પતિર્દેવિ રોગી નિરોગતાં વ્રજેત્ ।
અપુત્રઃ પુત્રમાપ્નોતિ ત્રિષુ લોકેષુ વિશ્રુતમ્ ॥ ૩॥

વન્ધ્યાપિ સૂતે તનયાન્ ગાવશ્ચ બહુદુગ્ધદાઃ ।
રાજાનઃ પાદનમ્રાઃ સ્યુસ્તસ્યદાસા ઇવ સ્ફુટાઃ ॥ ૪॥

અરયઃ સઙ્ક્ષયં યાન્તિ મનસા સંસ્મૃતા અપિ ।
દર્શનાદેવ જાયન્તે નરા નાર્યોઽપિ તદ્વશાઃ ॥ ૫॥

કર્તા હર્તા સ્વયંવીરો જાયતે નાત્રસંશયઃ ।
યં યં કામયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૬॥

દુરિતં ન ચ તસ્યાસ્તે નાસ્તિ શોકાઃ કદાચન ।
ચતુષ્પથેઽર્ધરાત્રે ચ યઃ પઠેત્સાધકોત્તમઃ ॥ ૭॥

એકાકી નિર્ભયો ધીરો દશાવર્તં સ્તવોત્તમમ્ ।
મનસા ચિન્તિતં કાર્યં તસ્ય સિધિર્ન સંશયઃ ॥ ૮॥

વિના સહસ્રનામ્ના યો જપેન્મન્ત્રં કદાચન ।
ન સિદ્ધો જાયતે તસ્ય મન્ત્રઃ કલ્પશતૈરપિ ॥ ૯॥

કુજવારે શ્મશાને ચ મધ્યાહ્ને યો જપેદથ ।
શતાવર્ત્યા સર્જયેત કર્તા હર્તા નૃણામિહ ॥ ૧૦॥

રોગાન્તર્ધો નિશાયાન્તે પઠિતામસિ સંસ્થિતઃ ।
સદ્યો નીરોગતામેતિ યદિ સ્યાન્નિર્ભયસ્તદા ॥ ૧૧॥

અર્ધરાત્રે શ્મશાને વા શનિવારે જપેન્મનુમ્ ।
અષ્ટોત્તરસહસ્રં તદ્દશવારં જપેત્તતઃ ॥ ૧૨॥

સહસ્રનામ ચેત્તદ્ધિ તદા યાતિ સ્વયં શિવા ।
મહાપવનરૂપેણ ઘોરગોમાયુનાદિની ॥ ૧૩॥

તદા યદિ ન ભીતિઃ સ્યાત્તતો દ્રોહીતિ વા ભવેત્ ।
તદા પશુબલિં દદ્યાત્સ્વયં ગૃણ્હાતિ ચણ્ડિકા ॥ ૧૪॥

યથેષ્ટં ચ વરં દત્ત્વા યાતિ પ્રત્યઙ્ગિરા શિવા ।
રોચનાગુરુકસ્તૂરી કર્પૂરમદચન્દનઃ ॥ ૧૫॥

કુઙ્કુમપ્રથમાભ્યાં તુ લિખિતં ભૂર્જપત્રકે ।
શુભનક્ષત્રયોગે તુ કૃત્રિમાકૃતસત્ક્રિયઃ ॥ ૧૬॥

કૃતસમ્પાતનાસિદ્ધિર્ધારયેદ્દક્ષિણે કરે ।
સહસ્રાનામ સ્વર્ણસ્થં કણ્ઠે વાપી જિતેન્દ્રિયઃ ॥ ૧૭॥

તદા યન્ત્રે નમેન્મન્ત્રી ક્રુદ્ધા સમ્પ્રિયતે નરઃ ।
યસ્મૈ દદાતિ યઃ સ્વસ્તિ સ ભવેદ્ધનદોપમઃ ॥ ૧૮॥

દુષ્ટશ્વાપદજન્તૂનાં ન ભીઃ કુત્રાપિ જાયતે ।
બાલકાનામિમાં રક્ષાં ગર્ભિણીનામપિ ધ્રુવમ્ ॥ ૧૯॥

મોહનં સ્તમ્ભનાકર્ષમારણોચ્ચાટનાનિ ચ ।
યન્ત્રધારણતો નૂનં જાયન્તે સાધકસ્ય તુ ॥ ૨૦॥

નીલવસ્ત્રે વિલિખતં ધ્વજાયાં યદિ તિષ્ઠતિ ।
તદા નષ્ટા ભવત્યેવ પ્રચણ્ડા પરિવાહિની ॥ ૨૧॥

એતજ્જપ્તં મહાભસ્મ લલાટે યદિ ધારયેત્ ।
તદ્દર્શનત એવ સ્યુઃ પ્રાણિનસ્તસ્ય કિઙ્કરાઃ ॥ ૨૨॥

રાજપત્ન્યોઽપિ વશગાઃ કિમન્યાઃ પરયોષિતઃ ।
એતજ્જપ્તં પિબેત્તોયં માસૈકેન મહાકવિઃ ॥ ૨૩॥

પણ્ડિતશ્ચ મહાદીક્ષો જાયતે નાત્રસંશયઃ ।
શક્તિં સમ્પૂજ્ય દેવેશિ પઠેત્સ્તોત્રં વરં શુભમ્ ॥ ૨૪॥

ઇહ લોકે સુખમ્ભુક્ત્વા પરત્ર ત્રિદિવં વ્રજેત્ ।
ઇતિ નામસહસ્રં તુ પ્રત્યઙ્ગિરા મનોહરમ્ ॥ ૨૫॥

ગોપ્યં ગુપ્તતમં લોકે ગોપનીયં સ્વયોનિવત્ ॥ ૨૬॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે દશવિદ્યારહસ્યે
શ્રીપ્રત્યઙ્ગિરાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail,
PSA Easwaran

*ShrIpratyangira Sahasranamastotra*
pdf was typeset on January 22, 2022

Please send corrections to *sanskrit@cheerful.com*